श्री सूर्य स्तोत्रं

श्री सूर्य स्तोत्रं

ध्यानं –
ध्यायेत्सूर्यमनंतकोटिकिरणं तेजोमयं भास्करं
भक्तानामभयप्रदं दिनकरं ज्योतिर्मयं शंकरं |
आदित्यं जगदीशमच्युतमजं त्रैलोक्यचूडामणिं
भक्ताभीष्टवरप्रदं दिनमणिं मार्तांडमाद्यं शुभं || 1 ||

कालात्मा सर्वभूतात्मा वेदात्मा विश्वतोमुखः |
जन्ममृत्युजराव्याधिसंसारभयनाशनः || 2 ||

ब्रह्मस्वरूप उदये मध्याह्ने तु महेश्वरः |
अस्तकाले स्वयं विष्णुस्त्रयीमूर्तिर्दिवाकरः || 3 ||

एकचक्ररथो यस्य दिव्यः कनकभूषितः |
सोऽयं भवतु नः प्रीतः पद्महस्तो दिवाकरः || 4 ||

पद्महस्तः परंज्योतिः परेशाय नमो नमः |
अंडयोनिर्महासाक्षी आदित्याय नमो नमः || 5 ||

कमलासन देवेश भानुमूर्ते नमो नमः |
धर्ममूर्तिर्दयामूर्तिस्तत्त्वमूर्तिर्नमो नमः || 6 ||

सकलेशाय सूर्याय क्षांतेशाय नमो नमः | [छायेशाय]
क्षयापस्मारगुल्मादिदुर्दोषव्याधिनाशनं || 7 ||

सर्वज्वरहरं चैव कुक्षिरोगनिवारणं |
एतत् स्तोत्रं शिव प्रोक्तं सर्वसिद्धिकरं परं |
सर्वसंपत्करं चैव सर्वाभीष्टप्रदायकं || 8 ||

इति श्री सूर्य स्तोत्रं |